# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-१ (SEM-1) | प्रश्नपत्र-६ | गुणाः - ७० |
| विषयः- साहित्यम् | CC-111 | समयः - ०३ तः ०६ |
| दिनाङ्कः - १०/१२/२०१६ | सन्दर्भग्रन्थः - रघुवंशम् ( सर्गः-२ ) | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वयोः सन्दर्भपूर्वकं व्याख्यां कुर्वन्तु । ०८**

१. निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ।
पयोधरीभूतचतुः समुद्रां जुगोप गोरूपधरामिवोर्वीम् ॥

२. आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ॥

३. शशाम वृष्ट्याऽपि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ।
ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वने गोप्तरि गाहमाने ॥

**प्र-२ रघुवंशग्रन्थकर्तुः परिचयं लिखत । ०८**

**अथवा**

**कालिदासस्य उपमावैशिष्ट्यं लिखत ।**

**प्र-३ द्वयोः टिप्पणीं लिखत । ०४**

१. दिलीपस्य गोसेवा ।

२. स्ववीर्यगुप्ता हि मनोः प्रसूतिः ।

३. यशोधनो धेनुमृषेर्मुमोच ।

४. हरिणीनां दिलीपदर्शनम् ।

**प्र-४ पञ्चप्रश्नानां लघुत्तराणि लिखत । ०५**

१. रघुवंशस्य रचयिता कः अस्ति?

२. रघुवंशं खण्डकाव्यमस्ति अथवा महाकव्यमस्ति?

३. रघुवंशस्य द्वितीयसर्गस्य प्रारम्भः केन शब्देन भवति?

४. दिलीपनृपस्य भार्याया नाम किमस्ति?

५. स्मृतिः कमर्थमनुगच्छति?

६. कुञ्जेषु दिलीपस्य यशः काभिः उद्गीयमानं अस्ति?

७. पवनः कीदृशं दिलीपं सिषेवे?

**॥ द्वितीयान्वितिः ॥**

**प्र-५ द्वयोः ससन्दर्भं व्याख्यां कुर्वन्तु । ०८**

१. प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता ।
प्रणम्य चानर्च विशालयस्याः श्रृङ्गान्तरं द्वारमिवार्थसिद्धेः ॥

२. अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ।
गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ॥

३. ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः ॥

**प्र-६ दिलीपस्य गोसेवावर्णनं रघुवंशद्वितीयसर्गाधारेण लिखत ।** **०८**

**अथवा**

**सिंहदिलीपयोः संवादं रघुवंशद्वितीयसर्गाधारेण लिखत ।**

**प्र-७ टिप्पणीं लिखन्तु । ( एका )** **०२**

१. चित्रार्पितारम्भ इवाऽवतस्थे ।

२. सिंहस्य परिचयः ।

**प्र-८ निम्नेषु द्वयोरतिलघूत्तरं लिखत ।** **०२**

१. कालिदासस्य कः अलङ्कारः प्रसिद्धः अस्ति?

२. सिंहस्य नाम किमस्ति?

३. अष्टमूर्तिः कस्य नाम अस्ति?

४. सिंहः कस्य वृक्षस्य रक्षणाय नियुक्तः?

**॥ तृतीयान्वितिः ॥**

**प्र-९ द्वयोः व्याख्यां कुर्वन्तु ।** **०८**

१. प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभङ्गे वितथप्रयत्नः ।
जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः ॥

२. एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम् ॥

३. निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच ।
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ॥

**प्र-१० सिंहस्य दिलीपं प्रति वक्तव्यं लिखत ।** **०८**

**अथवा**

**नन्दिनीद्वारा दिलीपाय वरप्रदानं वर्णयत ।**

**प्र-११ टिप्पणीं लिखत । ( द्वयोः )** **०४**

१. विसृज्यतां धेनुरियं महर्षेः ।

२. प्रजाः प्रजानाथ पितेव पासि ।

३. दिलीपस्य गोभक्तिः ।

४. दिलीपस्य राजधानीं प्रति प्रस्थानम् ।

**प्र-१२ पञ्चानामतिलघूत्तरं लिखत ।** **०५**

१. दिलीपः कस्य प्रभावात् प्रत्याहतास्त्रः अभवत्?

२. वज्रपाणिः कस्य नाम अस्ति?

३. समृद्धं राज्यं केन समानमस्ति?

४. क्षत्त्रशब्दः कस्मिन्नर्थे रूढः अस्ति?

५. सम्बन्धं कीदृशमाहुः?

६. कस्योपरि पुष्पवृष्टिः पपात?

७. द्वितीयसर्गे कति श्लोकाः सन्ति?